PURANETIHASA

ACHARYA 2nd YEAR
Course/Paper.8

# PART - A

# गर्गसंहिता (गोलकखण्डः)

## *Gargasaṃhitā (Gōlakakhaṇḍaḥ)*


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# श्रीमद्गर्गसंहिता

## गोलकखण्ड:(प्रथमाध्ययत: विंशाध्यायपर्यन्तम्)

## (स्वाध्ययनसामग्री)

यदुवंशीयानां पुरोहित: गर्गाचार्य: एव गर्गसंहितां रचितवान् । एष: गर्गाचार्य: महान् ज्ञानी,विद्वान्,ज्योतिर्विद् च आसीत् । गर्गसंहिता न केवलं ज्योतिषाधारितं शास्त्रं भवति अपि तु अत्र भगवत: श्रीकृष्णस्य लीलाचरितानि वर्णितानि सन्ति । एषा गर्गसंहति मधुर-श्रीकृष्णलीलया परिपूर्णास्ति । अत्र राधिकाया: माधुर्यभावलीलानामपि वर्णनं समुपलभ्यते । श्रीमद्गर्गसंहितायां यत् किमपि सूत्ररूपेण उक्तमासीत्,तत्सर्वमत्र गर्गसंहितायां विस्तृतरूपेण आविष्कृतमस्ति । अत्र गर्गसंहिता भवति श्रीकृष्णलीलाया: महाभारतस्य च अपररूपमिव । श्रीमद्भागवते श्रीकृष्णस्य रासविषया: केवलं पञ्चसु अध्यायेषु वर्णिता: सन्ति । परन्तु गर्गसंहितायां वृन्दावनखण्डे,गोलकखण्डे तथा अन्यत्रापि बहुषु स्थलेषु श्रीकृष्णस्य रासविषया: सरसतया वर्णिता: सन्ति । गर्गसंहिताया: माधुर्यखण्डे गोलकखण्डे च विभिन्नगोपीनां पूर्वजन्मवृत्तान्ता: बहुसुन्दरतया वर्णिता: सन्ति । गर्गसंहितायां बहुनूतनकथा: उपस्थापिता: सन्ति । एषा संहिता भक्तजनानां कृते परमसमादरस्य वस्तु भवति । यतो हि अत्र भागवतोक्तगूढतत्त्वानां सम्यक् स्पष्टवर्णनं समुपलभ्यते ।

श्रीकृष्णस्य पूर्णताविषये श्रीमद्भागवते मर्हर्षिव्यास: केवलं कृष्णस्तु भगवान् स्वयमिति उक्तवान् । परन्तु भगवत: श्रीकृष्णस्य पूर्णताया: विषये गर्गसंहितायां गर्गाचार्य: विस्तृततया कथयति यत्-

यस्मिन् सर्वाणि तेजांसि विलीयन्ते स्वतेजसि ।

तं वदन्ति परे साक्षात् परिपूर्णतमं स्वयम् ।।

गर्गसंहितायां राधाकृष्णयो: विवाह: वर्णितोस्ति । गर्गसंहितायां दशखण्डा: सन्ति । तेषां नामानि यथा- गोलक-वृन्दावन-गिरिराज-माधुर्य-मथुरा-द्वारका-विश्वजित्-बलभद्र-विज्ञान-अश्वमेधखण्ड: इति । एवम्प्रकारेण गर्गसंहिता श्रीकृष्णलीलीवर्णनपुर:सरं जनसामान्यानां कृते तदा तदा नीतिश्लोकान् सुभाषितानि च उपदिश्य सर्वान् सन्मार्गे प्रेरयति । गर्गाचार्य: श्रीकृष्णस्य समसामयिक आसीत् । अत: श्रीकृष्णलीलाविषये गर्गाचार्येण प्रणीता गर्गसंहिता एकप्रामाणिकग्रन्थत्वेन विद्वद्भि: आद्रियते । अत: नूतनतथ्यानां समुपस्थापनात् विषयगाम्भीर्यात् सरलभाषाशैलीभ्यां लिखितत्वात्

तदा तदा नीतिश्लोकानां सुभाषितानाञ्च आविष्करणत्वात् महर्षिगर्गाचार्येण विरचिता एषा गर्गसंहिता श्रीकृष्णलीलाविषयग्रन्थेषु प्रामाणिकत्वेन किमपि वैशिट्यमधिरोहते एव । प्रस्तुतपाठ्यक्रमे एतादृशस्य गर्गसंहितापुराणस्य सम्पूर्णगोलोकखण्डस्य विंशतिः अध्यायाः आलोचिताः सन्ति । अतः परीक्षार्थिनां सौविध्यार्थं तेषां विंशतेः अध्यायानां सारसंग्रहत्वेन अत्र चतुरंशेषु विभज्य सम्यक् आलोचनं विहितमस्ति ।

# प्रथमांशः

## प्रस्तावना-

श्रीमद्गर्गसंहितायाः प्रस्तुतपाठ्यक्रमस्यास्मिन् प्रथमांशे विशेषतः कलिदोषवर्णनपुरःसरं धरित्रीदेव्याः रक्षणाय,भूभारहरणाय,दुष्टविनाशनपूर्वकं सज्जनपालनाय च गोलोकधाम्नि देवादीनां श्रीकृष्णदर्शनं तथा स्तुतिवाचनेन धरायामवतरितुं निवेदनं श्रीकृष्णस्य च अवतारग्रहणाय अङ्गीकरणादिकं वर्णितमस्ति । तदनु अत्र प्रसङ्गतः अवतारतत्त्वमाविष्कृतमस्ति ।

## उद्देश्यम्-

प्रियपाठकाः गर्गसंहितायाः प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

**१. कलिदोषवर्णनपुरस्सरं धर्मह्रासता एवं चातुर्वण्यसंकरतादिविषयाणामुपस्थापनम् ।**

**२. श्रीकृष्णजन्मनः पूर्ववृत्तान्तः ।**

**३. देवानां गोलकधामदर्शनं भगवत्स्तुतिश्च।**

**४. अवतारतत्त्वम् ।**

## कलिदोषवर्णनपुरस्सरं धर्मह्रासता एवं चातुर्वण्यसंकरतादिविषयाणामुपस्थापनम् ।

विशेषतः कामक्रोधाभिभूता मनुष्याः कलौ युगे भगवन्तमवजानन्ति । सर्वे जनाः केवलायां विषयलिप्सायां मग्ना एव । श्रुतिस्मृत्यादिभिर्विवर्जितो मनुष्यो भगवद्भक्तिशून्यः सन् दिनं यापयति कलौ युगे । अतः कलौ युगे मनुष्याणामात्यन्तिककल्याणार्थं भगवान् धरायामवतरति । कलावसुराः यवनांशेषु जन्म प्राप्य लोकोपतापिनो भवन्ति । अतः केवलस्याऽत्याचारस्याऽविचारस्य च प्रादुर्भावो भवति । वैश्याः कूटवृत्तिमवलम्ब्य केवलं विषयमेव सर्वस्वं मन्यन्ते । ब्राह्मणा धर्मनष्टा, वेदरहिताः, सदाचारविवर्जिताश्च भवन्ति । क्षत्रियास्त्यक्तराज्याः शूद्राः स्वामिष्वभक्ताश्च जायन्ते । स्त्रियः पररताः सुताः त्यक्तमातृपितृस्नेहाः तच्छुश्रूषारहिता भवन्ति । तदाऽतिभारा धरा गोरूपं धृत्वा ब्रह्मसदनं संप्राप्य ब्रह्मणे स्वदुःखानि निवेदितवती । धरण्याः दुःखमवगम्य ब्रह्मा क्षणं विचिन्त्य देवताभिः धरण्या च सह गोलोकं नाम श्रीकृष्णालयमागतवान् ।

**बोधप्रश्नाः–**

१. कलौ युगे मनुष्याः कमवजानन्ति ?

**श्रीकृष्णजन्मनः पूर्ववृत्तान्तः ।**

विशेषतः कामक्रोधाभिभूता मनुष्याः कलौ युगे भगवन्तमवजानन्ति । सर्वे जनाः केवलायां विषयलिप्सायां मग्ना एव । श्रुतिस्मृत्यादिभिर्विवर्जितो मनुष्यो भगवद्भक्तिशून्यः सन् दिनं यापयति कलौ युगे । तदाऽतिभारा धरा गोरूपं धृत्वा ब्रह्मसदनं संप्राप्य ब्रह्मणे स्वदुःखानि निवेदितवती । धरण्याः दुःखमवगम्य ब्रह्मा क्षणं विचिन्त्य देवताभिः धरण्या च सह गोलोकं नाम श्रीकृष्णालयमागतवान् । तत्र ब्रह्मादयः सर्वे देवाः वेदरूपैः वाक्यैः श्रीकृष्णस्य स्तुतिं चकार । श्रीकृष्णः देवानां स्तुस्त्या सन्तुष्टो भूत्वाऽवदत्- हे ब्रह्मन् ! अहं लोकेषु मे मनोहररूपं प्रदर्श्य भुवो भारं हरिष्यामि । पुनश्च तस्याज्ञया सर्वदेवाः यादवेषु जनिष्यन्तीति श्रीकृष्णः आदिष्टवान् । एवं ब्रह्मणे प्रदत्तवचनानुसारं श्रीकृष्णः वसुदेवतो देवक्यां अजायत ।

श्रीमद्गर्गसंहितायां देवकीवसुदेवयोः पूर्वजन्म सूचयित्वा भगवान् श्रीकृष्णः स्वजन्मनः पूर्ववृत्तमपि सूचयति । तद्यथा- सुतपाः पृश्निश्च भगवन्तं विष्णुं पुत्ररूपेण प्राप्तुं परमं तपः चक्रतुः । तयोर्भक्त्या प्रसन्नेन विष्णुना वरः प्रदत्तो यत् अदितिकश्यपरूपेण, देवकीवसुदेवरूपेण च जातयोस्तयोः पुत्रत्वमवश्यं स यास्यतीति । तदनु गर्गसंहिता श्रीकृष्णस्यावतरणलीलामेवं वर्णयति । तद्यथा- यदा धर्मस्य ह्रासो भवति, अधर्मः प्रवर्द्धते, गावः सीदन्ति, ब्राह्मणानां पीडनं भवति, भूमिः दुर्जनानां पापाचारैः सततं भाराक्रान्ता भवति तदा भगवान् स्वयमाविर्भवति । भुवः भारहरणाय कंसादीनाञ्च वधाय ब्रह्मा-विष्णु-महेशादयः देवेश्वराः धरण्या सह गोलोकं गत्वा श्रीकृष्णाय सर्वं निवेदयामासुः । श्रीकृष्णोऽपि भुवि अवतीर्य दुर्जनान् निहत्य सज्जनानां पालनं कर्तुं वचनं दत्तवान् । पुनश्च तस्याज्ञया सर्वदेवाः यादवेषु जनिष्यन्तीति श्रीकृष्णः आदिष्टवान् ।

**बोधप्रश्नः -**

१. गोरूपं धृत्वा ब्रह्मसदनं का गतवती ?

**देवानां गोलकधामदर्शनं भगवत्स्तुतिश्च।**

श्रीमद्गर्गसंहितायाः अस्मिन् प्रथमांशे विशेषतः भूभाररहरणाय ब्रह्मादिदेवानां गोलकधाम्नि श्रीकृष्णदर्शनं,स्तुतिकरणञ्च वर्णितमस्ति । देवानां प्रार्थनामङ्गीकृत्य श्रीकृष्णः धरायामवतरितुं सम्मतो भवति, तथा देवान् अपि स्वांशेन अवतरितुमादिशति । भगवतः श्रीकृष्णस्य आश्वासनं प्राप्य सर्वे देवाः प्रणतिपुरःसरं तस्य स्तुतिं चक्रुः । तद्यथा-

श्रीमद्गर्गसंहितायां परिपूर्णतमस्य तस्य स्वरूपमेवं निर्दिष्टमस्ति । यत्-

यस्मिन् सर्वाणि तेजांसि विलीयन्ते स्वतेजसि ।

तं वदन्ति परे साक्षात् परिपूर्णतमं स्वयम् ।। इति ।

पुनश्च श्रीकृष्णः एव परंब्रह्मपरिपूर्णावतार इति निरूपयता श्रीनारदेन गोलकखण्डे प्रथमाध्याये कथ्यते-

परिपूर्णतमः साक्षाच्छ्रीकृष्णो नान्य एव हि ।

एककार्यार्थमागत्य कोटिकार्यं चकार ह ।। इति ।

पूर्णः पुराणः पुरुषोत्तमोत्तमः

परात्परो यः पुरुषः परेश्वरः ।

स्वयं सदानन्दमयः कृपावित्

स एव कृष्णः प्रणिगद्यते बुधैः ।। इति।

पुनश्च तत्रैव- परिपूर्णतमः साक्षात् श्रीकृष्णो भगवान् स्वयम् ।

अखण्डब्रह्माण्डपतिर्गोलके धाम्नि राजते ।। इति ।

**बोधप्रश्नः -**

१. परिपूर्णतमः साक्षात् कः ?

## अवतारतत्त्वम्

**अवतारतत्त्वं** हिन्दुधर्मस्य मुख्यो विषयः । यद्यपि वेदेषु अवतारस्य सूचनामात्रं विद्यते, तथापि पुराणेषु विस्तृतविवेचनं समुपलभ्यते । उपासनानिमित्तं भगवतः साकरत्वमपेक्षते । भगवान् विभिन्नेषु अवतारेषु साकारत्वं प्राप्तवान् । निराकारोऽपि भगवान् अवतारमाध्यमेन रूपं गृह्णाति । तैश्च रूपैः आराधितो भगवान् भक्तेभ्योऽमृतं ददाति । सम्पूर्णकलायुक्तो भगवान् सर्वेषु वस्तुषु व्याप्य वर्त्तते । सांसारिकेषु जीवेषु भगवत्कलायाः सत्ता अनुभूयते । जीवानां मध्ये अस्याः भगवत्कलायाः तारतम्यं दृश्यते । उद्भिदेषु एकस्याः स्वेदजेषु द्वयोः, अण्डजेषु तिसृणां जरायुजेषु चतसृणां, मनुष्येषु पञ्चकलाभ्यः अष्टकलापर्यन्तानाञ्च कलानां विकाशो दृश्यते । अष्टकलातः अधिकानां कलानां विकाशो देवैः ऋषिमुनिभिश्चांऽगी क्रियते । अतो भगवत्कलानामाधिक्यात् अष्टकलातः आरभ्य पञ्चदशकलापर्यन्तं भगवतः अवताराः आगच्छन्ति । किन्तु स्वयं भगवान् अथवा तत्पूर्णावतारः केवलं षोडशकलापरिपूर्णो भवति । अतः मत्स्यादि-श्रीरामान्ताः अवताराः पञ्चदश कलामध्ये स्थिताः वर्तन्ते । केवलं भगवान् श्रीकृष्ण एव पूर्णावतारः कथ्यते । षोडशकलापूर्णत्वात् कृष्णः स्वयं भगवान् कथ्यते । भागवते तदेव प्रतिपादितं यत्- "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति"। अयमेव कृष्णः स्वयं भगवान् अपि कार्यार्थं पूर्णावताररूपेण स्वयमेवाऽवतरति । अस्मात् ज्ञायते यद् भगवतः रूपद्वयं विद्यते। सर्वेश्वररूपमवताररूपञ्चेति । अनेनाऽवताररूपेण भगवान् धर्ममर्यादा-रक्षणार्थं युगे युगे अवतीर्य्य असाधूनां विनाशेन साधूनां रक्षणेन च स्वकार्यं सम्पादयति।

अधुनाऽवतारप्रयोजनं शास्त्रदृष्ट्या विचार्यते । जगत्यस्मिन् यदा धर्मस्य ह्रासोऽधर्मस्य वृद्धिः गोब्राह्मणानां विषादः सज्जनानामुद्वेगः, पापीनाञ्च समुल्लासो जायते, तदा भगवान् स्वयमाविर्भूय धर्मं रक्षति अधर्मं नाशयति दुर्जनान् निहत्य सज्जनान् च पालयति । स्वावतारस्य प्रयोजनं भगवान् श्रीकृष्णः एतदेव गीतायां स्वयं कथयति यत्- "यदा यदा हि धर्मस्ये"ति । अत्राऽवतारधारणस्य प्रयोजनानि ज्ञायन्ते - प्रथमं सज्जनानां संरक्षणं, द्वितीयं दुष्टानां दमनम्, तृतीयञ्च धर्मस्य संस्थापनमिति । अनेन प्रकारेण ब्रह्मपुराणादिष्वप्यवतार-प्रयोजनमाविष्कृतं वर्तते। धर्मसंस्थापनादिकं भगवता प्रेरितेन केनाऽपि योगसिद्धजीवेन कर्त्तुं शक्यते । किन्तु जीवानां मोक्षो भगवत्प्राप्तिरूपो नान्येन केनापि भवितुमर्हति । अतः स्वयं भगवान् अवतीर्य्य विभिन्नानि रूपाणि धृत्वा कर्माणि च कृत्वा जीवानां मोक्षप्रााप्तिं सरली- करोति । भगवान् यानि रूपाणि नामानि च स्वीकृत्य कर्माणि करोति तानि नामरूपकर्मादीनि कीर्त्तयन् शृण्वन् स्मरन् च सांसारिको जनो मोक्षं लभते । अतो जीवानां निःश्रेयसः साधनम् एवाऽवतारस्य मुख्यं प्रयोजनम् । एतदेव भागवते कथितं यत्-

**नृणां निःश्रेयसार्थाय व्यक्रियभगवद्रूपः ।**
**अव्ययस्याऽप्रमेयस्य निर्गुणस्य गुणात्मनः ।।** इति ।

पुनश्च भागवतदृष्ट्या जीवानां शिक्षणमेव भगवत: अवतारप्रयोजनं भवति । भगवान् विभिन्नेष्ववतारेषु यानि कर्माणि करोति, तेषु यानि लौकिकानि तानि जीवैः अनुकरणीयानि भवन्ति । तानि कर्माण्यनुकृत्य मानव: समाजे श्रेष्ठपुरुषरूपेण प्रशस्यते। पुनश्च भगवता ये धर्मा: तेषु तेष्ववतारेषु पाल्यन्ते तान् पालयित्वा मानव आदर्शपुरुषो भवति । अतो भगवतोऽवतारधारणं केवलं राक्षसाणां वधार्थं न भूत्वा लोकशिक्षार्थमपि भवति। भागवते पञ्चमस्कन्धे हनुमता एतदेव प्रतिपादितं यत्-

**मर्त्यावतारस्त्विह मर्त्यशिक्षणं ।**

**रक्षो वधायैव न केवलं विभोः इति ।।**

अतोऽस्माभि: सामूहिकभावेन प्रयोजनद्वयं ज्ञातमभूत् । एकं मुख्यम् अपरञ्च गौणं भवति । गौणं तु धर्मसंस्थापनं दुष्टनिवारणं सज्जनपालनञ्च भवति । मुख्यप्रयोजनस्य प्रतिपादकं मुख्यत: श्रीमद्भागवतं वर्तते । गौणप्रयोजनस्य प्रतिपादिकानि ब्रह्म, विष्णु, देवीभागवत, महाभागवतानि वर्तन्ते । यद् भवतु भगवतोऽवतारो जीवानां मोक्षाय, सत्शिक्षायै, धर्मप्रवर्त्तनायाऽधर्मनाशाय, दुष्टविनाशाय शिष्टपालनाय चोदिष्टो भवति ।

गर्गसंहितायां देवर्षिनारद: अवतारस्य षड्भेदान् प्रतिपादयति । यथा- अंशावतारः, अंशांशावतारः, आवेशावतारः, कलावतारः, पूर्णावतारः, परिपूर्णावतारश्चेति । सृष्टिकर्त्ता ब्रह्मा भगवतोऽंशावतार: कथ्यते । मचीच्यादय: ऋषय: अंशांशावतारा: कथ्यन्ते । भृगुप्रभृतय: मुनय: आवेशावतारा: सन्ति । मत्स्यकूर्मादय: कलावतारा: भवन्ति । श्रीरामनृसिंहादय: पूर्णावताराः, भगवान् श्रीकृष्णश्च परिपूर्णावतार: कथ्यते । अनेन प्रकारेण कार्यार्थं प्रकाशमानस्य भगवत: कलाऽऽवेशादिभेदेन बहुभेदभिन्नावतारा: शास्त्रेषु प्रतिपाद्यन्ते ।

**अवतारभेदाः -**

पुराणेष्ववतारस्य पञ्चभेदा: स्वीक्रियन्ते (क) पूर्णावतार: (ख) अंशावतार: (ग) विशेषावतार: (घ) अविशेषावतार: (ङ) नित्यावतारश्चेति ।

प्रथमत: कलादृष्ट्या अवतार: पूर्णावतारः, अंशावतारश्चेति द्विधा विभज्यते। नवमकलात: पञ्चदशकलापर्यन्तं प्रकाशितोऽवतार: अंशावतार: कथ्यते । संपूर्णाभि: षोडशकलाभि: प्रकाशितोऽवतार: पूर्णावतार: कथ्यते । परशुराम: द्वादशकलावतार: आसीत् । किन्तु रामचन्द्रेण कलाहरणात् परं स परशुराम: केवलं मुनिमात्रमभवत् । भगवान् रामश्च अंशावतार एव । नृसिंहोऽपि तथाभूतोऽस्ति । एतेषु पञ्चदशकलाभ्यन्तरे एव कलानां विकाश: आसीत् । किन्तु भगवान् श्रीकृष्ण: पूर्णावतारो वर्तते । स एव षोडशकलापरिपूर्ण: स्वयं भगवान् एव कार्यार्थं स्वरूपेण अवतीर्ण: आसीत् । अंशावताराणां कर्म एकदेशस्थमेककालस्थञ्च भवति । किन्तु पूर्णावतारस्य कर्म सकलभूमण्डलस्य सकलकालस्य च हितकरं भवति । तत्कर्मणा सर्वेषां जीवानां हितं जायते ।

**उद्देश्यम्-**

प्रियपाठका: गर्गसंहिताया: प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्याम: ।

**१. कलिदोषवर्णनपुरस्सरं धर्मह्रासता एवं चातुर्वण्यसंकरतादिविषयाणामुपस्थापनम् ।**

**२. श्रीकृष्णजन्मन: पूर्ववृत्तान्त: ।**

**३. देवानां गोलकधामदर्शनं भगवत्स्तुतिश्च।**

**४. अवतारतत्त्वम् ।**

**बोधप्रश्न: -**

गर्गासंहितायां देवर्षिनारद: अवतारस्य कति भेदान् प्रतिपादयति ?

## सारांश:

श्रीमद्गर्गसंहिताया: प्रस्तुतपाठ्यक्रमस्यास्मिन् प्रथमांशे मुख्यतया कलिदोषवर्णनपुर:सरं धर्मह्रासता एवं चातुर्वण्यसंकरतादिविषयाणामुपस्थापनं, धरित्रीदेव्या: रक्षणाय,भूभारहरणाय,दुष्टविनाशनपूर्वकं सज्जनपालनाय च गोलोकधाम्नि देवादीनां श्रीकृष्णदर्शनं तथा स्तुतिवाचनेन धरायामवतरितुं निवेदनं श्रीकृष्णस्य च अवतारग्रहणाय अङ्गीकरणादिकं वर्णितमस्ति । तदनु अत्र प्रसङ्गत: अवतारतत्त्वमाविष्कृतमस्ति । एवम्प्रकारेण प्रथमांशस्य सारांशोत्र आविष्कृतोस्ति ।

### आदर्शप्रश्ना:

**लघुत्तरीयप्रश्ना:-**

१. कलिदोषान् वर्णयत ।

२. श्रीकृष्णजन्मन: पूर्ववृत्तं वर्णयत ।

३. गर्गसंहितानुसारं अवतारभेदान् लिखत ।

**विश्लेषणात्मकप्रश्ना: –**

१. अवतारप्रयोजनमुद्दिश्य लिखत ।

२. श्रीकृष्णस्य कृते देवानां स्तुतिमुद्दिश्य लिखत ।

**निबन्धात्मकप्रश्ना:-**

१. अवतारतत्त्वं व्याख्यात ।

२. श्रीकृष्णस्य धरावतरणमुद्दिश्य लिखत ।

**एकाङ्कप्रश्ना:-**

१. भगवत: विष्णो: कति अवतारा: सन्ति ।

२. गर्गसंहितानुसारं कति अवतारभेदा: सन्ति ।

३. धरित्रीदेवी किं रूपं धृत्वा ब्रह्मण: समीपे गतवती ।

४. सुतपा: नाम क: ।

५. पृश्नि: नाम क: ।

६. क: अंशावतार: ।

७. के अंशांशावतारा: ।

८. क: आवेशावतार: ।

९. के कलावतारा: ।

१०. के पूर्णावतारा: ।

११. क: परिपूर्णावतार: ।

१२. वासुदेव: नाम क: ।

**उत्तराणि-**

१. दश २. षड्भेदा: ३. गोरूपम् ४. पृश्निदेव्या: पति: ५. वामनस्य माता ६. ब्रह्मा ७. मरीच्यादय: ऋषय: ८. परशुरामावतार: ९. मत्स्यकूर्मादय: १०. श्रीरामनृसिंहादय: ११. श्रीकृष्ण: १२. श्रीकृष्ण:

# द्वितीयांश:

## प्रस्थावना-

श्रीमद्गर्गसंहितायां प्रस्तुतपाठ्यक्रमस्यास्मिन् द्वितीयांशे विशेषत: नन्दादीनां लक्षणं,राधिकाजन्मवृत्तं, बलरामस्य जन्मविवरणं, श्रीकृष्णजन्म,नामकरणं तथा तस्य जन्मोत्सवपरिपालनञ्च यथाग्रन्थं सम्यगालोचितमस्ति ।

## उद्देश्यम्-

प्रियपाठका: गर्गसंहिताया: प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्याम: ।

**१. नन्दादीनां लक्षणविषये विवरणम् ।**

**२. राधिकाजन्मवृत्तस्य समुपस्थापनम् ।**

**३. बलरामस्य जन्मविवरणम् ।**

**४. श्रीकृष्णजन्म तथा तस्य नामकरणञ्च ।**

**५. नन्दकृतकृष्णजन्मोत्सव: ।**

### नन्दादीनां लक्षणविषये विवरणम्

श्रीमद्गर्गसंहितायां नन्दादीनां नामलक्षणानि सविशदं वर्णितमस्ति । तद्यथा- ये जना: सदैव गा: पालयन्ति तथा गोपालनमेव येषां जीविका भवति, तेषां तु गोपाल: इति संज्ञा भवति । इदानीं क्रमश: तेषां लक्षणमुच्यते । सगोपालकै: नवलक्षगवां पति: नन्द: इति उच्यते एवं पञ्चलक्षगवां पति: उपनन्द: इति कथ्यते । स: एव वृषभानु: इति उक्त: य: दशलक्षगवां ुपति: भवति । कोट्यर्धसंख्यका: गाव: यस्य भवन्ति स: वृषभानुवर: इति उच्यते । परन्तु यस्य अधीने कोटिसंख्यका: गाव: भवन्ति स: एव नन्दराज: इति प्रोक्तोस्ति । व्रजे नवनन्दा:, नवोपनन्दास्तथा षड्वृषभानवश्च आसन् । गर्गसंहितानुसारं नवनन्दानां नामानि यथा- गय:,विमल:,श्रीश्र:,श्रीधर:,मङ्गलायन:,मङ्गल:,रङ्गवल्लीश:,रङ्गोजि तथा देवनायक: एवेति । नवोपनन्दानां नामानि यथा- वीतिहोत्र:,अग्निभुक्,साम्ब:,श्रीवर:,गोपति:,श्रुत:,व्रजेश:,पावनस्तथा

शान्तश्चेति । गर्गसंहितानुसारं षड्वृषभानूनां नामानि यथा-नीतिवित्,मार्गद:,शुवल:,पतङ्ग:,दिव्यवाहनस्तथा गोपेष्ट: एवेति शम् ।

**बोधप्रश्न:-**

१.केषां गोपाल इति संज्ञा भवति ?

२. व्रजे कति वृषभानव: आसन् ?

**राधिकाजन्मवृत्तस्य समुपस्थापनम्**

सृष्ट्यादिव्यापारे भगवान् विष्णु: असकृत् विविधावतरान् वितनुते । तदा तेन सह तच्छक्तेरपि प्रकाशनम् अपेक्षते । शक्तिं विहाय शक्तिमत: सत्ताऽभाव: इति न्यायाल्लीलापुरुषोत्तमस्य भगवत: श्रीकृष्णस्याऽवतारकाले तन्मनोहारिणी ह्लादिनीशक्तिस्वरूपिणी श्रीरासविहारिणी निकुंजविलासिनी भगवती श्रीराधादेवी धरण्यामवतीर्य्य लीलासाधने पूर्णतां विदधाति ।

श्रीमद्गर्गसंहितायां राधाया: अवतरणलीलाया: सम्पूर्णवर्णनं समुपलभ्यते । भुव: भारापनोदनाय भक्तानां कल्याणाय च ब्रह्मणा प्रार्थित: सन् साक्षात् परंब्रह्म गोलोकपति: श्रीकृष्ण: भुवि अवतरितुं स्वीचकार । तस्य भुवि आगमनं निशम्य गोलोकपट्टमहिषी श्रीकृष्णप्राणाधिका राधा वियोगविह्वला सती विग्रहं न धारयितुं शपथं कृतवती । तदा श्रीकृष्णो मया सह त्वमप्यवतरिष्यसीत्युक्त्वा तां सान्त्वयामास । तद्यथा-

त्वया सह गमिष्यामि मा शोचं कुरू राधिके ।<br>
हरिष्यामि भुवो भारं करिष्यामि वचस्तव ।। इति ।

अथ श्रीकृष्ण स्वपराख्यं तेज: वृषभानुपत्न्यां निवेशयामास । तत: घनावृतव्योम्नि दिनस्य मध्यभागे भाद्रे सिते नागतिथौ सोमवासरे कलिन्दजाकूल-निकुञ्जदेशे राधा वृषभानो: मन्दिरे अवततार । तद्यथा-

अथैव राधा वृषभानुपत्न्या<br>
मावेश्यरूपं महस: पराख्यम् ।<br>
कलिन्दजाकूलनिकुञ्जदेशे

सुमन्दिरे साऽवततार राजन् ।। इति ।

पुनश्च तत्रैव- घनावृते व्योम्नि दिनस्य मध्ये

भाद्रे मसि नागतिथौ च सोमे ।

अवाकिरन् देवगणाः स्पुरद्भि

स्तन्मन्दिरे नन्दनजैः प्रसूनैः ।। इति ।

श्रीमद्गर्गसंहितानुसारं श्रीराधायाः वंशविषये इदं ज्ञायते यत् पितृणां मानसी कन्या कलावती मनुवंशसम्भूतं सुचन्द्रं परिणीतवती । ब्रह्मणः आदेशेन तौ पृथिव्यां जन्म अलभेताम् । सुचन्द्रः वृषभानुरूपेण गोकुले जन्म प्राप्तवान् । कलावती कान्यकुब्जे भलन्दनस्य पुत्रीरूपेण जन्म प्राप्तवती । वृषभानोः विवाहः कलावत्या सह अभवत् एवं तयोः कन्यारूपेण श्रीराधा अजायतेति शम् ।

**बोधप्रश्नः -**

गोलकपट्टमहिषी श्रीकृष्णप्राणाधिका प्रिया का ?

**बलरामस्य जन्मविवरणम्**

वसुदेवस्य पत्न्याः देवक्याः सप्तमगर्भः योगमायया समाकृष्य व्रजे रोहिणीगर्भे संस्थापितः । ततः व्रजे पञ्चमदिने भाद्रे मासि स्वातिनक्षत्रे षठ्याञ्च तिथौ शुक्लपक्षे बुधवासरे यदा सर्वे ग्रहाः उच्चस्थितौ सन्ति तदा तुलाख्यनक्षत्रे मध्याह्नवेलायाम् शेषनागस्य अवतारः बलभद्रस्य जन्म अभूत् । तदा कालः परमशोभनः दिशश्च सर्वाः प्रसन्नाः आसन् । तदा देवाः अम्बरतः पुष्पवृष्टिं कुर्वन्ति स्म । तदनु नन्दराजः वैदिकविप्रगणान् समाहूय तस्य रोहिणीपुत्रस्य जातकर्मादिकं कारातवान् । तदनु वेदव्यासप्रभृतयः मुनयः व्रजमागत्य बालरूपस्य अनन्तस्य दर्शनं कृतवन्तः ।

**बोधप्रश्नः -**

रोहिणीगर्भे कः सञ्जातः ?

**श्रीकृष्णजन्म तथा तस्य नामकरणञ्च**

गर्गसंहितानुसारं महर्षिनारदः महाराजबहुलाश्वं श्रीकृष्णस्य जन्मवृत्तान्तं गोकुलगमनं नन्दराजकृतकृष्णजन्मोत्सवपालनञ्च सविशदमुक्तवान् । नारदः उक्तवान् यत्- हे महाराज ! द्वापरयुगान्ते तथा कलियुगस्य प्रारम्भे अर्थात् युगद्वयस्य सन्धिकाले भाद्रे मासि कृष्णपक्षेऽर्धरात्रौ बुधवासरे रोहिणीनक्षत्रे श्रीकृष्णस्य जन्माऽभूत् । तदानीं लग्नस्य स्वामी उच्चस्थाने आसीत् । साधूनां मनांसि प्रसन्नानि, दशदिशः निर्मलाः तथाऽऽकाशे तारागणा विचित्रशोभावन्तः आसन् । तस्मिन् काले गृहे गृहे भगवन्नामकीर्त्तनं पूजनञ्च भवति स्म । इत्थं भूमौ सर्वत्र आनन्दः अनुभूयते स्म । सर्वे जनाः भगवत्भक्तौ लीनाः आसन् । पूर्वजन्मनि देवकीवसुदेवाभ्यां दिव्यसहस्रवर्षपर्यन्तं बहुकठिनतपस्याऽऽचरिता । अतो भगवान् ताभ्यां वरं दत्तवान् यत् तयोः पुत्ररूपेण जन्म नेष्यतीति । अतोऽस्मिन् समये सः भगवान् तयोर्गृहे जन्म नीतवान् । तत्परमरूपं धारयन् सः भगवान् ताभ्यां दर्शनं दत्तवान् । माता देवकी तथा पिता वसुदेवो भगवतः तमेव अद्भुतमम्बुजेक्षणं बालरूपं दृष्ट्वा प्रसन्नतापूर्वकं स्तुतिमकुरुताम् । एवम्प्रकारेण वसुदेवस्य देवक्याश्च स्तुतेरनन्तरं प्रसन्नो भूत्वा भगवान् साधारणबालकरूपं धृतवान् । एवञ्चाऽवदत् यत् हे पितः । भवान् मां नन्दालये स्थापयन् तस्य गृहे जाता कन्यामत्राऽनयतु । अस्मिन् विषये भवतो भयं किमपि न स्थास्यति । तदानीं कारागारस्य द्वाराण्यपि मुक्तान्यभवन् । आकाशे मेघगर्जनमारब्धं तथा मन्दमन्दवृष्टिरप्यभवत् । वसुदेवो बालरूपं श्रीकृष्णं शिरसि धारयन् तस्यामेव रात्रौ नन्दालयाभिमुखे यात्रां कृतवान् । सर्पाणां राजाऽऽगत्य बालकृष्णस्य मस्तकोपरि स्थित्वा तं जलधारातः दूरे स्थापितवान् । कियदनन्तरं वसुदेवो यमुनातीरं प्राप्तवान् । तदानीं यमुना वृष्टिजलेन परिपूर्णाऽऽसीत् । किन्तु तत्क्षणात् यमुना वसुदेवाय मार्गं ददती भागद्वयेन परिवर्त्तिताऽभूत् । वसुदेवो यमुनापारं गत्वा गोकुलनगरं प्राप्तवान् । तत्र सर्वे मायया निद्रिता आसन् । वसुदेवो बालकृष्णं यशोदायाः समीपे शाययित्वा तत्कन्यामानीय अतिशीघ्रं मथुरापुरीं प्रत्यागतवान् । अनन्तरं गोकुले महोत्सवः आरब्धः । सर्वे गोकुलवासिनो नन्दराजस्य पुत्रत्वेन बालकृष्णं दृष्ट्वा आनन्दिता अभवन् । तदनु एकदा यदूनां कुलपुरोहितः वेदवेदज्ञः ज्योतिर्विद् सर्वमान्यः गर्गाचार्यः नन्दराजस्य भवने उपस्थितः अभूत् । नन्दराजः तस्य गुरुगौरवमण्डितस्य गर्गाचार्यस्य अर्घ्याद्दिदानपूर्वकं प्रणतिपुरस्सरं स्वागतसत्कारं विहितवान् । तदनु गर्गाचार्यस्य परामर्शधिया नन्दराजः तस्य बालपुत्रद्वयं गोपनस्थलमिति गोशालां प्रति आनीतवान् । तत्र गोशालायां गोपनस्थले ज्ञानिनां वरः ज्योतिर्विद् गर्गाचार्यः गणनाथादीन् संपूज्य ग्रहादीन् च

सम्यक् संशोध्य बलरामस्य तथा बालकृष्णस्य च शास्त्रदिशा विचार्य समुपयुक्तं नामकरणं सम्पादितवान् ।

**बोधप्रश्नः -**

१.कंसः कारागारे कं निगृहीतवान् ?

२. वसुदेवस्य पत्नी का ?

**नन्दकृतकृष्णजन्मोत्सवः**

श्रीकृष्णजन्मोत्सवस्य सुन्दरवर्णनं गर्गसंहितायां समुपलभ्यते । पुत्रः जातः इति श्रुत्वा नन्दः स्नानादिकं समाप्य उत्तमाभरणैः भूषितः भूत्वा ब्राह्मणानाहूय पुत्रस्य जातकर्मसंस्कारेण सह देवानां पितृणाञ्च विधिपूर्वकं पूजनमपि कारितवान् । अनन्तरं नन्दराजः महामनाः ब्राह्मणेभ्यः दक्षिणाभिश्च आनन्देन लक्षं गवां ददौ । तदनु मृदङ्गवीणाशंखाद्याः दन्दुभयश्च मुहुर्मुहुः वादिताः अभवन् । नन्दराजस्य द्वारदेशे गायकाः गीतगानं कृतवन्तः वारयोषितश्च नर्तितवत्यः । नन्दराजस्य पुत्रजन्मोत्सवो भवतीति सर्वे गोपाः नन्दगृहमागत्य बालकृष्णस्य दर्शनं कृतवन्तः । एवञ्चोक्तवन्तो यथा- हे नन्द ! अस्य बालकस्य गोकुलगमनादनन्तरं गोकुले सर्वाणि शुभलक्षणानि दृश्यन्ते। अतोऽयं स्वयं विष्णुरेवेति । गोपगोपीनामीदृशं वचनं श्रुत्वा नन्दः आत्मानं पूर्णाऽऽशिषं चिन्तितवान् । नन्दराजस्य पुत्रजन्मोत्सवो भवतीति व्रजे मंगलान्याविर्भूतान्यभवन् । सर्वे दिव्यवस्त्रावृतास्तथा दिव्याभरणभूषिताश्चासन् । नानाविधं गानं नृत्यादिकञ्च प्राचलत् । गावो वस्त्रमाल्यपर्वतधातुभिश्चित्रिताः अभवन् । वृषाः गावश्च वत्सान् स्वांगानि च लिहन्ति तथा पुच्छान् उर्ध्वं क्षिप्त्वा इतस्ततः प्रधावन्ति स्म । गोपाः गोप्यश्च प्रमुदिताः सन्तः दधिकर्द्दमं कृत्वा परस्परं विलिम्पन्ति स्म । ब्रह्मवादिनां द्विजानां श्रुतिघोषस्तत्राऽभवत्। दुन्दुभ्यानकतूर्याणां शंखादीनाञ्च निस्वनैः गगनपवनप्रकम्पितमभूत् । सर्वेषां गृहकर्माणि परित्यक्तान्यभवन् । अधिकं किं कथयामः, सर्वे स्वशरीरमपि न सस्मरुः । इत्थं नन्दगृहे अष्टप्रहरपर्यन्तमखण्डानन्दस्य वृद्धिरभूत्। महामान्यो नन्दः सर्वेभ्यः उत्तमं दानं ददौ, तथा सूतमागधवन्दिभ्यः वासोऽलंकारभोजनानि प्रायच्छत् । एवं प्रकारेण नन्दकृतः श्रीकृष्णजन्मोत्सवः श्रीमद्गर्गसंहितायां समुपलभ्यते ।

**बोधप्रश्न: -**

१. व्रजस्य राजा क: ?

२. यशोदा कस्य पत्नी ?

## सारांश:

श्रीमद्गर्गसंहितायां प्रस्तुतपाठ्यक्रमस्यास्मिन् द्वितीयांशे विशेषत: नन्दादीनां लक्षणं,राधिकाजन्मवृत्तं, बलरामस्य जन्मविवरणं, श्रीकृष्णजन्म,नामकरणं तथा तस्य जन्मोत्सवपरिपालनञ्च यथाग्रन्थं सम्यगालोचितमस्ति । अत: एते विषया: एव द्वितीयांशस्य सारांशत्वेन छात्रा: जानीयु: ।

## आदर्शप्रश्ना:

**लघुत्तरीयप्रश्ना:-**

१. नन्दादीनां लक्षणानि वर्णयत ।

२. नन्दराजस्य विषये विवृणुत ।

३. गर्गसंहितानुसारं बलरामस्य जन्मवृत्तान्तं लिखत ।

**विश्लेषणात्मकप्रश्ना: –**

१. श्रीराधाया: जन्ममुद्दिश्य लिखत ।

२. श्रीकृष्णस्य नामकरणमुद्दिश्य लिखत ।

**निबन्धात्मकप्रश्ना:-**

१. श्रीकृष्णावतारप्रसङ्गं प्रपञ्चयत ।

२. नन्दकृतकृष्णजन्मोत्सवं वर्णयत ।

**एकाङ्कप्रश्ना:-**

१. संकर्षण: नाम क: ।

२. कस्या: गर्भे बलराम: सञ्जात: ।

३. श्रीकृष्णस्य नामकरणं क: कृतवान् ।

४. राधिकाया: मातु: नाम किम् ।

५. राधिकायाः पितुः नाम किम् ।

६. राधिकायाः जन्म कस्मिन् वासरे अभूत्।

७. बलरामस्य जन्म कस्मिन् वासरे अभूत् ।

८. श्रीकृष्णस्य जन्म कस्मिन् वासरे अभूत् ।

९. नन्दस्य लक्षणं किम् ।

१०. उपनन्दस्य लक्षणं किम् ।

११. कः नन्दराजः ।

१२. वृषभानोः लक्षणं किम् ।

१३. कस्यां तिथौ श्रीकृष्णस्य जन्म अभूत् ।

१४. कस्यां तिथौ बलरामस्य जन्म अभूत् ।

१५. कस्यां तिथौ राधिकायाः जन्म अभूत् ।

१६. यदूनां कुलपुरोहितः कः ।

**उत्तराणि-**

१. बलरामः २. रोहिण्याः गर्भे ३. गर्गाचार्यः ४. कलावती/कीर्तिः ५. वृषभानुः ६. सोमवासरे ७. बुधवासरे ८. बुधवासरे ९. नवलक्षगवां पतिः नन्दः १०. पञ्चलक्षगवां पतिः उपनन्दः ११. कोटिसंख्यकानां गवां पतिः नन्दराजः १२. दशलक्षगवां पतिः वृषभानुः १३. अष्टम्यां तिथौ १४. षठ्यां तिथौ १५. अष्टम्यां तिथौ १६. गर्गाचार्यः

# तृतीयांश:

**प्रस्तावना-**

श्रीमद्गर्गसंहिताया: प्रस्तुतपाठ्यक्रमस्यास्मिन् तृतीयांशे विशेषत: भूभारहरणाय,दुष्टविनाशनपूर्वकं सज्जनपालनाय च व्रजधाम्नि बालकृष्णस्य दैत्यवधलीला वर्णितास्ति । अस्मिन् क्रमे अत्र प्रथमत: श्रीकृष्णेन पूतनानिधनं तत: शकटासुरमारणं तदनु तृणावर्तनिधनञ्च वर्णितमस्ति ।

**उद्देश्यम्-**

प्रियपाठका: गर्गसंहिताया: प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्याम: ।

**१. श्रीकृष्णस्य पूतनावधलीलाविमर्श: ।**

**२. शकटासुरवधवृत्तान्त: ।**

**३. श्रीकृष्णस्य तृणावर्तवधलीलाविमर्श: ।**

**श्रीकृष्णस्य पूतनावधलीलाविमर्श:**

भगवत: अवतरणे मुख्यहेतु: लीलारसाऽऽस्वादनमिति शास्त्रेषु निश्चितम् । लीलारसाऽऽस्वादनसमये गौणप्रयोजनान्यपि स्वत: सिध्यन्ति । तद् यथा असुरसंहार:, सत्पालनं, पृथिव्या: भारापनोदनं चेति । एवं भगवान् श्रीकृष्ण: आविर्भूय लीलारसाऽऽस्वादनमध्ये पृथिव्या: भारभूतान् बहून् दैत्यान् विनिहत्य, साधून् पृथिवीञ्च पालयामास । अधुनाऽत्र तस्या: दैत्यवधलीलाया: विमर्श: गर्गसंहितानुसारं यथावत् क्रियते ।

**पूतनावध: -**

भगवान् श्रीकृष्ण: स्वाविर्भावाऽनन्तरं प्रथमत: कंसप्रेरितां बालघातिनीं पूतनां हेलया निहत्य मातृगतिं दत्तवान् । लोकबालघ्नी साऽतिदुर्लभां मातृगतिं कथं प्राप्तवतीति संशयनिराकरणार्थं तस्या: पूर्वजन्मवृत्तन्यासपूर्वकं तत्वधकथाऽधुना प्रस्तूयते ।

**पूतनावधकथा –**

श्रीमद्गर्गसंहितायां भगवत: श्रीकृष्णस्यावतरणलीलावर्णनान्तरं तज्जन्मोत्सवस्य सुन्दरं वर्णनं समुपलभ्यते। तदनन्तरं पूतनामोक्षलीला विस्तृतरूपेण वर्णिताऽस्ति । नन्दो यदा गृहे उपस्थितो

नासीत्, तदैव कंसेन प्रेरिता बालघातिनी पूतना दिव्यं षोडशीरूपं धृत्वा व्रजमागतवती । तदनु सा बालं श्रीकृष्णमङ्कमादाय कालकूटविषावृतं स्तनं ददौ । स च हरि: पूतनाया: प्राणै: साकं कटुदुग्धं पीतवान् । तदनु नन्दादय: पूतनाया: विशालदेहं कुठारै: छिन्नीकृत्य ज्वालितवन्त: । तस्मात् चतुर्दिशि सुगन्धो व्याप्तोऽभूत्, यतो हि तत्र श्रीकृष्णस्य हस्तस्पर्श: आसीदिति । एवं प्रकारेण गर्गसंहितायां पूतनामोक्षलीला वर्णितास्ति ।

**पूतनाया: पूर्वजन्मवृत्तम् -**

श्रीमद्गर्गसंहितायां नारदमहर्षि: महाराजबहुलाश्वं पूतनाया: पूर्वजन्मवृत्तं कथयति । अस्मिन् प्रसङ्गे वामनावतारकथामादाय तत्र बले: कन्याया: रत्नमालाया: कथा चर्चिताऽस्ति । तत्र पूतना पूर्वजन्मनि बले: कन्या आसीदिति वर्णितमस्ति । सा कथं पूतना जाता तद्विषये गर्गसंहितायामेवं वर्णितमस्ति । तद्यथा- शुचिस्मितमुखं वामनं दृष्ट्वा बलिराजस्य कन्याया: रत्नमालाया: तस्मिन् पुत्रस्नेह: आगत: । परन्तु अनन्तरं तमेव वटुं स्वपितरं बलिराजं छलन्तं दृष्ट्वा तस्या: मनसि क्रोध: आगत: । सा चिन्तितवती “यदि एतादृश: पुत्र: मम भवेत् तर्हि अहं तं विषयुक्तं स्तनं पाययन्ती मारयिष्यामि । अत: जन्मान्तरे सा मातृवत् श्रीकृष्णं स्तन्यमपाययत्, किन्तु राक्षसीभावेन सा तत् कर्म सम्पादितवतीति तात्पर्यम् ।

भगवत: एकं कार्यमथवा चरित्रमनेकार्थस्य साधकत्वमिति शास्त्र-वचनात् पूतनोद्धारलीलाया: अपि मुख्यप्रयोजनद्वयमस्ति । यथा १) दुष्टवध: २) बालकरक्षा च । अस्मादतिरिच्य भक्ते: महत्त्वस्याभिव्यञ्जना, भगवदनुग्रहस्याऽभिव्यंजनादीनि अन्यानि कारणान्यपि सन्तीति शम् ।

**बोधप्रश्न: -**

१. कंसेन प्रेरिता बालघातिनी का ?

२. बालकृष्ण: कस्या: प्राणै: साकं कटुदुग्धं पीतवती ?

**शकटासुरवधवृत्तान्त:**

पूतनामोक्षलीलानन्तरं गर्गसंहितायां शकटभञ्जनलीलाया: वर्णनमुपलभ्यते । तत्र वर्णितं यत् एकदा कृष्णमाता यशोदा गोपगोपान् समाहूय द्विजै: स्वसुतस्य मंगलविधानमकरोत् । गृहागतानामभ्यागतानां सत्कारे निमज्जिता सा शकटाधो भागे शायितस्य स्वपुत्रस्य रोदनं नाश्रुणोत् ।

तदानीं कंसेन प्रेरित: उत्कचाख्यो दैत्य: तत्रागत्य शकटं बालस्य मूर्ध्नि पातयितुं प्रवृत्तोऽभवत् । सर्वज्ञ: श्रीकृष्णस्तदानीं तं दैत्यं पादेन ताडयित्वा शकटं बभञ्ज । अथ चूर्णतां गते शकटे स दैत्य: स्वतनुं परित्यज्य दिव्यशरीरं धृत्वा कृष्णं नत्वा च गोलोकं जगाम । संहितायामुत्कचस्य पूर्वजन्मवृत्तान्तोऽपि वर्णितोऽस्ति । श्रीमद्भागवते शकटभञ्जनलीलाया: वर्णनं यादृशं संहितायामपि तादृशं वर्तते । किमपि वैषम्यं नोपलक्ष्यते। केवलमधिकतया गर्गसंहिता शकटासुरस्योत्कचेति नामवत्त्वं सूचयित्वा तत्पूर्वजन्मवृत्तमपि समुपस्थापयति ।

शकटभञ्जनलीलाया: अन्यत्कारणमेकं यत्- गर्गसंहितानुसारं लोमशऋषे: शापेन शप्तो हरिण्याक्षस्य पुत्र उत्कचनामक: असुर एव सूक्ष्मरूपेण तस्मिन् शकटे अवस्थित: आसीत् । श्रीकृष्णस्य चरणस्पर्शेण स मुक्तो जात: । अत: उत्कचस्य शापमुक्तिरपि शकटभञ्जनलीलाया: अन्यत् प्रयोजनमासीदिति विज्ञेयम् ।

शकटभञ्जनलीलाया: प्रतीकार्थता निम्नोक्तरीत्या प्रतिपाद्यते । यथा- श्रीकृष्णस्य औथानिकोत्सवे श्रीकृष्णं दुग्धं पाययन्ती माता यशोदा तं शकटस्याऽध: स्थापयन्ती शायितवती, एवं स्वयं गृहागतानाम् अतिथीनां स्वागतकार्ये मग्नाऽभूत् । अत्र श्रीकृष्ण: यशोदाया: स्वविषयिकीं (श्रीकृष्णविषयिकी) विस्मृतिं तथा प्रपञ्चविषयकरतिं निवारयितुमेव शकटस्योत्क्षेपणं कृतवान् । अस्या: लीलाया: आध्यात्मिकाऽभिप्रायोऽयं यत् प्रपञ्चे लीनानां बहिर्मुखजीवानां भगवत्विस्मृतिं निवारयितुं भगवान् तेषां धनक्षत्यादिकानि कार्याणि संघटयति, यद्द्वारा जीवानां बहिर्मुखता नश्येत् । यतो हि भगवदासक्ते: कृते कारणरूपदु:खस्य उपस्थिति: कदाचित् आवश्यक्येवेति निश्चप्रचम् ।

**बोधप्रश्न: -**

श्रीकृष्णस्य चरणस्पर्शेण क: मुक्तो जात: ?

**श्रीकृष्णास्य तृणावर्तवधलीलाविमर्श:**

कंसप्रेरितस्य बालघातिन: चक्रवातरूपस्य तृणावर्तस्य पूर्वजन्मवृत्त-प्रकाशपूर्वकं तत्वध: गर्गसंहितायां सरसतया वर्ण्यते । तदत्र छात्राणां कृते सरलतया स्वाध्ययनसामग्रीत्वेन समुपस्थाप्यते ।

**तृणावर्तवधकथा**

गर्गसंहितायां तृणावर्तवधलीला निम्नोक्तप्रकारेण वर्णिताऽस्ति । तद्यथा- यशोदा श्रीकृष्णमुत्संगे लालयन्त्येव स्वबालं गिरिसदृशं गुरुभारममन्यत । विस्मिता सा तं शिशुं भूमौ

शाययित्वा कार्यान्तरेऽन्यत्र गतवती । तदैव कंसेन प्रेरितस्तृणावर्तो दैत्य: क्रीडन्तं शिशुं जहार। लक्षयोजनपरिमितं दूरं नभस्स्थलं यदा गतस्तदा स: स्वस्कन्धे आरुढं शिशुं गुरुभारयुक्तममन्यत । अत: स: तं शिशुमध: पातयितुमुद्यमं चकार । तदा तस्य गलग्रहणपूर्वकं श्रीकृष्णस्तस्य प्राणान् हृतवान् । तृणावर्तस्य प्राणज्योति: श्रीकृष्णस्य विग्रहे लीनतां गता । मृततृणावर्तेण साकं बालकृष्णोपि भूमौ पतितोभूत् । तदा गोपीका: बालकृष्णं नीत्वा मात्रे यशोदायै अर्पितवत्य: । माता यशोदा बालकृष्णं स्तन्यं पाययित्वा विलापं कृतवती । कथं तस्य पुत्रस्य सुरक्षा भवेदिति चिन्तिताभूत् । तदा तत्र विद्वाँस: विप्रा: उपस्थिता: अभवन् । ते विप्रा: शास्त्रोक्तविधिविधानेन विभिन्नवेदमन्त्रोच्चारणपूर्वकतया भगवत्स्त्रोत्रवाचनेन च बालकृष्णस्य रक्षणं कृतवन्त: । तदनु आनन्दितो नन्दराज: तान् वैदिकब्राह्मणगणान् सम्यक् भोजयित्वा दक्षिणारूपेण धनधान्यादिकमर्पितवान् ।

**तृणावर्तस्य पूर्वजन्मकथा -**

तृणावर्त: पूर्वजन्मनि सहस्त्राक्षनामा पाण्डयदेशस्य एक: प्रतापवान् राजा आसीत् । स: हरिभक्तो धर्मनिष्ठो यज्ञकृद्दानतत्परश्च आसीत् । एकदा स: रेवातटे लतावेत्रसमाकुले सहस्त्रनारीभि: साकं रममाण: आसीत् । तदानीं तत्रागतं दुर्वासामुनिं दृष्ट्वापि कामरत: स: राजा तं न प्रणमितवान् । तत: दुर्वासस: शापहेतो: सोऽसुरयोनिं प्राप्तवानिति गर्गसंहितायां वर्णितमस्ति ।

**बोधप्रश्न: -**

कंसेन प्रेरित: चक्रवातरूप: असुर: क: ?

पाण्ड्यदेशस्य राजा क: ?

## सारांश:

श्रीमद्गर्गसंहिताया: प्रस्तुतपाठ्यक्रमस्यास्मिन् तृतीयांशे विशेषत: भूभारहरणाय,दुष्टविनाशनपूर्वकं सज्जनपालनाय च व्रजधाम्नि बालकृष्णस्य दैत्यवधलीला वर्णितास्ति । अस्मिन् क्रमे अत्र प्रथमत: श्रीकृष्णेन पूतनानिधनं तत: शकटासुरमारणं तदनु तृणावर्तनिधनञ्च वर्णितमस्ति । प्रसङ्गत: अत्र तेषां दैत्यानां पूर्वजन्मवृत्तमपि उपन्यस्तमस्ति । अस्य तृतीयांशस्य सारांशत्वेन उपर्युक्तविषयान् छात्रा: जानीयु: ।

## आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः-**

१. कंसस्य प्रमुखानुचराणां नामानि लिखत ।

२. पूतनायाः वराङ्गनारुपसौन्दर्यं वर्णयत ।

३. बालकृष्णचापल्यमाविष्कुरुत ।

**विश्लेषणात्मकप्रश्नाः –**

१. शकटासुरभञ्जनवृत्तान्तं विशदयत ।

२. लोमशमुनेः शापदानविषये विवृणुत ।

**निबन्धात्मकप्रश्नाः-**

१. पूतनावधमुद्दिश्य लिखत ।

२. तृणावर्तनिधनं प्रपञ्चयत ।

**एकाङ्कप्रश्नाः-**

१. कंसेन प्रेरिता बालघातिनी का ।

२. पूतना पूर्वजन्मनि का आसीत् ।

३. रह्नमाला का ।

४. बलिराजस्य कन्यायाः नाम किम् ।

५. पृश्निगर्भः कः ।

६. पदत्रयेण भुवनत्रयं कः मापितवान् ।

७. वैरोचनः नाम कः ।

८. उत्कचः नाम कः ।

९. लोमशमुनिः कं शप्तवान् ।

१०. श्रीकृष्णस्य पदाघातेन कः शापमुक्तोभूत् ।

११. यशोदा कस्य पह्नी ।

१२. माता यशोदा कं शकटस्याधः स्थापितवान् ।

१३. तृणावर्तः पूर्वजन्मनि कः आसीत् ।

१४. सहस्राक्षः नाम कः ।

१५. पाण्ड्यदेशस्य राज्ञः नाम किमासीत् ।

१६. बलिराजं कः छलितवान् ।

**उत्तराणि-**

१. पूतना २. बलिराजस्य कन्या रत्नमाला ३. बलिराजस्य कन्या ४. रत्नमाला ५. वामनावतारः विष्णुः ६. वामनावतारः विष्णुः ७. बलिराजः ८. हिरण्याक्षसुतः दैत्यः ९. उत्कचाख्यं दैत्यम् १०. उत्कचाख्यो दैत्यः(शकटासुरः) ११. नन्दराजस्य १२. बालकृष्णम् १३. पाण्ड्यदेशस्य राजा सहस्राक्षः १४. पाण्ड्यदेशस्य राजा १५. सहस्राक्षः १६. वामनावतारो विष्णुः

# चतुर्थांश:

## प्रस्तावना-

तृणावर्तान्तान् राक्षसान् भगवान् श्रीकृष्ण: वयस: षण्मासाभ्यन्तरे हेलया हत्वा अनन्तरं किञ्चिद्वय: प्राप्त: सन् स्वलीलाचातुर्यं प्रकाशयितुं समारेभे । तदारभ्य या: लीला: प्रकाशिता: अभवन्, ता एव बाललीलारूपेण शास्त्रेषु प्रसिद्धा जाता:। एवंविधासु लीलासु नवनीतहरणादय: तिस्र: लीला: गर्गसंहितायां सरसतया वर्णिता: सन्ति । अधुनाऽत्र क्रमशस्ता विमृश्यन्ते । अस्मिन् क्रमे अत्र प्रथमत: श्रीकृष्णस्य नवनीतहरणं तथा तस्या: लीलीया: तात्पर्यं,तत: गोपीनां गृहेभ्यो नवनीतहरणं,तत्र लीलाचातुर्यञ्च वर्णितमस्ति । तदनु कृष्णस्य मृद्भक्षणं,कृष्णमुखे यशोदाया: ब्रह्माण्डदर्शनञ्च उपन्यस्तमस्ति । तत: यमलार्जुनवृक्षयो: वृक्षत्वलाभहेतु: यमलार्जुनभङ्गश्च इति एते विषया: श्रीमद्गर्गसंहिताया: प्रस्तुतपाठ्यक्रमस्यास्मिन् चतुर्थांशे विशेषत: वर्णिता: सन्ति ।

## उद्देश्यम्-

प्रियपाठका: गर्गसंहिताया: प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्याम: ।

**१. बालकृष्णस्य नवनीतहरणं तथा तस्या: लीलीया: तात्पर्यम् ।**

**२. गोपीनां गृहेभ्यो नवनीतहरणं,तत्र लीलाचातुर्यञ्च ।**

**३. बालकृष्णस्य मृद्भक्षणं,कृष्णमुखे यशोदाया: ब्रह्माण्डदर्शनञ्च ।**

**४. उलूखले यशोदया कृष्णबन्धनरूपलीला तथा एतस्या: लीलाया: तात्पर्यम् ।**

**५. यमलार्जुनवृक्षयो: वृक्षत्वलाभहेतु: यमलार्जुनभङ्गश्च ।**

## बालकृष्णस्य नवनीतहरणं तथा तस्या: लीलीया: तात्पर्यम्

तृणावर्तान्तान् राक्षसान् भगवान् श्रीकृष्ण: वयस: षण्मासाभ्यन्तरे हेलया हत्वा अनन्तरं किञ्चिद्वय: प्राप्त: सन् स्वलीलाचातुर्यं प्रकाशयितुं समारेभे । तदारभ्य या: लीला: प्रकाशिता: अभवन्,ता एव बाललीलारूपेण शास्त्रेषु प्रसिद्धा जाता: । एवंविधासु श्रीकृष्णस्य बाललीलासु नवनीतहरणलीला अत्यन्तं सरससुन्दरमनोज्ञतया भक्तजनानां हृदयमावर्जयति नितरां निश्चप्रचमिति नास्ति सन्देहस्य लेशोपि अवकाश: ।

**नवनीतहरणलीला-**

एतल्लीलातात्पर्यं श्रीमद्भागवते ब्रह्मा भगवतः स्तुतिं कुर्वन् कथयति-

**अस्यापि देव वपुषो मदनुग्रहस्य ।**
**स्वेच्छामयस्य न तु भूतमयस्य कोऽपि ।। इति ।**

अर्थात् ब्रह्मा भगवन्तं कथयति यत्- भवान् ममोपरि कृपां विधातुमेवेदं स्वेच्छामयं सच्चिदानन्दरूपं प्रकटितवान् अस्ति । इदं कदापि पाञ्चभौतिकं न भवति । अतः अस्मात् स्पष्टं जातं यत् भगवतः सर्वं अप्राकृतमेव । इत्थं इयं नवनीतहरणलीलाऽपि अप्राकृता दिव्या एव ।

भगवतः लीलाविषयस्य विचारणसमये सर्वदा इयं कथा मनसि धारणीया यत्, भगवतः लीलाधाम, भगवतः लीलापात्रं, भगवतः लीलाशरीरमेवं तस्य लीला, सर्वाणि एतानि न प्राकृतानि अपि तु दिव्यान्येव । भगवति देह-देही-भेदः नास्ति। उक्तञ्च महाभारते-

**न भूतसंघसंस्थानो देवस्य परमात्मनः ।**
**यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः ।।**
**न सर्वस्माद् बहिष्कार्यः श्रौतस्मार्तविधानतः ।**
**मुखं तस्यावलोक्याऽपि सचैलः स्नानमाचरेत् ।। इति ।**

अतः इदं विचारणीयं यत् श्रीकृष्णगतप्राणाः, श्रीकृष्णरसभक्तिमतीनां गोपीनां मानसिकस्थितयः किमाऽऽसन्निति । गोपीनां तनुमनधनादयः सर्वं श्रीकृष्णस्य आसीत्। ताः श्रीकृष्णार्थे संसारे जीवन्ति स्म, एवं गृहस्य सर्वाणि कार्याणि श्रीकृष्णार्थे एव कुर्वन्ति स्म । रात्रौ दधीनां घनीभूतकरणसमये श्यामसुन्दरस्य मधुरमूर्त्तिं ध्यायन्ती प्रत्येकगोपी इदमभिलषति यत् मम दधिः सुन्दरतया पुञ्जीभूता भवतु । श्रीकृष्णस्य कृते अहं तस्मादुत्कृष्टानि तथा बहुनवनीतानि निष्काषयामि, एवं तानि श्रीकृष्णस्य हस्तगतं यथा भवेत्, तावत् उच्चतायां स्थापयामि । अनन्तरं मम प्राणधनः श्रीकृष्णः सखिभिः सह आगत्य क्रीडन् च मम गृहं प्रविश्य नवनीतानि चोरयिष्यति । एवमहं निलीयः श्रीकृष्णस्य नवनीतहरणलीलां पश्यन्ती जीवनं सार्थकं करिष्यामि, पुनः सहसा तं गृहीत्वा हृदये स्पृशामि ।

स्वकीयानां व्रजवासिनां सुखार्थमेव भगवान् श्रीकृष्णः गोकुले विचरति स्म। नवनीतं तु नन्दस्य गृहेऽपि स्वल्पं नासीत् । लक्षशः गावः नन्दगृहे आसन् । सः (कृष्णः) यथेच्छं नवनीतं खादितुं शक्नुयात् । परन्तु सः न तु केवलं नन्दस्य आसीत्, अपि तु सर्वेषां व्रजवासिनाम् आत्मीय एव । अतः सः सर्वान् आनन्दयितुम् इच्छति स्म । गोपीनां लालसां पूरयितुमेव स तासां गृहं गत्वा नवनीतानि चोरयन् खादति स्म । एतत्तु वास्तविकं न चौर्यमेव । इदं तु गोपीनां पूजापद्धतीनां भगवता स्वीकरणमेव । भक्तवत्सलः भगवान् भक्तानां पूजां कथं न स्वीकुर्यात् ।

भगवतः अस्याः दिव्यनवनीतहरणलीलायाः रहस्यं न जानन्तः कति जनाः इमां लीलामनादर्शा इति आख्यापयन्ति । तै प्रथमतः ज्ञातव्यं यत् चौर्यं किं नाम । चौर्यं तदेव उच्यते यदा

अन्यस्य कस्य द्रव्यं तस्येच्छां विना, तस्य अज्ञानेन, अग्रे सः यथा न जानीयादिति इच्छां स्थापयन् कः यदि नयति, तदा एव चौर्यं भवति । परन्तु भगवान् श्रीकृष्णस्तु नवनीतानि हरति गोपीनाम् इच्छया एव, गोपीनामज्ञानतः न हि । तासां पश्यन्त्यः तासां सम्मुखे एव धावन् नवनीतानि नीत्वा श्रीकृष्णः पलायति स्म । द्वितीया महत्त्वपूर्णा कथा इयं यत्- संसारे अथवा संसारात् बहिः ईदृशं किं वस्तुमस्ति यत् भगवतः न ? एवं सः तस्य चौर्यं कुर्यात् ? गोपीनां सर्वस्वमेव भगवतः आसीत् । समग्रं जगत् एव तस्य । अतः सः कथं कस्य चौर्यं कुर्यात् । आम्, चौरस्तु वास्तवतः स एव ज्ञेयः यः भगवतः वस्तुं स्वकीयं चिन्तयन् ममताऽऽसक्त्याम् आवद्धा भवति, एवं दण्डस्य पात्रं भवति । उपर्युक्ताभ्यः सर्वाभ्यः दृष्टिभ्यः सिद्ध्यति यत्- भगवतः नवनीतहरणं वास्तवतः न चौर्यम्, अपि तु भगवतः दिव्यलीला एव । प्रकृतपक्षे गोप्यः प्रेमाधिक्यात् हि तं भगवन्तं चौर इत्याख्यापयन्ति स्म । यतो हि सः तासां चित्तचौरस्तु आसीदेवेति ।

उपर्युक्ताभ्यः सर्वाभ्यः दृष्टिभ्यः सिद्ध्यति यत्- भगवतः नवनीतहरणं वास्तवतः न चौर्यम्, अपि तु भगवतः दिव्यलीला एव । प्रकृतपक्षे गोप्यः प्रेमाधिक्यात् हि तं भगवन्तं चौर इत्याख्यापयन्ति स्म । यतो हि सः तासां चित्तचौरस्तु आसीदेवेति शम्।

**बोधप्रश्नः -**

१. व्रजे नवनीतहरणलीलां कः करोति स्म ?

२. कासां तनुमनोधनादयः सर्वं श्रीकृष्णस्य आसीत् ?

**गोपीनां गृहेभ्यो हरणम्, तत्र लीला-चातुर्यञ्च-**

गर्गसंहितायां महर्षिनारदः महाराजं बहुलाश्वं बालकृष्णस्य चरितानि वदन् नवनीतहरणलीलामपि कथयति । नारदः कथयति हे बहुलाश्व! यदा बालकृष्णः पद्भ्यां चलितुं समर्थोऽभवत्, तदारभ्य गोपीनां गृहं गन्तुं विविधचेष्टामकरोत् । गोप्यश्च तस्य दर्शनार्थं नन्दगृहं प्रतिदिनं निजभाण्डानयनव्याजेनाऽऽगच्छन्ति स्म । एवं निजभाण्डं भग्नं तथा गोरसपूरितं पश्यन्ति स्म । बालकृष्णस्य विभिन्नबालचेष्टादिभिः तासां मन आनन्देन परिप्लुतं भवति स्म । बालकृष्णः क्रमशो गोपीनां गृहं गत्वा दधिदुग्धादिकं पीत्वा आगच्छति स्म । या गोपी तस्य कृते दधिदुग्धादिकं न ददाति स्म, बालकृष्णः तस्याः तावद् गृहीत्वा खादति स्म । भक्ता भगवते द्रव्याणि प्रयच्छन्ति, यतो हि

भगवान् तेभ्यो भोगान् ददातीति । पूर्वं भक्तैः देहागारसुतादिकं भगवते निवेदितम्, किन्तु व्रजे भगवान् बालविनोदेन तेषां सर्वं स्वीकरोति स्म । गोपीनां गृहे शिक्यस्थितं गोरसं समालोक्य तज्जिघृक्षया पीठोलूखलमाश्रित्य बालकृष्णः तत्सर्वं हरति स्म । तान् गोरसान् किञ्चिद्भुक्त्वा तदेव बालकेभ्यो दत्त्वाऽवशिष्टान् भूमौ निक्षिप्य चान्यद्गृहं गच्छन् आसीत् । एवं गृहाद्गृहं गत्वा दधिदुग्धादिकं चोरयति स्म । गृहेश्वरी गृहमागत्य सर्वं चेष्टितं, भग्नं क्षिप्तं वा भाण्डं, हृतं द्रव्यञ्च दृष्ट्वा भृशं संक्रोशते स्म । समीपस्थात् कस्यादपि सखीजनान्नन्दपुत्रेणैतत्कार्यं कृतमिति ज्ञात्वा तां समीपस्थां सखीं गृहीत्वा बालकृष्णकृतकर्मणः साक्षिभूतं निजमन्दिरं दर्शयामास । यावत् सा सखी बालकृष्णस्य विचेष्टितं द्रष्टुं विशति, तावत्तस्याः गृहं गत्वा पूर्ववदाचरितं तेन । साऽऽत्मनो गृहं पुनरागत्य बालकृष्णापहृतं द्रव्यं वीक्ष्य विस्मिता भवति स्म । तदा साऽऽक्रोशं कृत्वा वदति स्म । केनागत्य कृतं त्विदम् ? अधुनैव गेहाद् अन्यस्याः गृहमीक्षितुं मया गतम् । मम गेहेऽखिलः भाण्डगोरसः केन नाशित इति, गृहे गृहे एवं स्त्रीभिः प्रकटीकृतः । ततः एकदा ताः सर्वा मम मातरं वक्तुमुद्यता अभवन् । यशोदा तासामभियोगान् श्रुत्वाऽऽश्चर्यं प्रकटयन्ती उत्तरितवती- हे गोपीकाः भवत्यः किं वदन्ति ? मम कृष्णस्तु सदैव मम गृहे तिष्ठति, कुत्र न गच्छतीति । तच्छ्रुत्वा गोप्यः स्वस्वगृहं प्रस्थिताः । ततो बालकृष्णः सखिभिः सह अन्यस्या भवनं गतवान् । तद्गृहं गृहिणीशून्यं वीक्ष्य ते सर्वे गृहाभ्यन्तरं गतवन्तः । तद्गृहं दधिदुग्धादिकं, तथा नानारसविशिष्टं पक्वान्नादिकञ्च विलोक्य ते बालकृष्णादयः भृशं मुदिता अभवन् । तदनु ते सर्वे बालगोपालाः द्वारं कपाटञ्च दत्वा यथेच्छया खादितुं प्रयतितवन्तः । अनन्तरं गृहस्य गृहिणी प्रभावती नामिका गोपी तत्रागत्य स्वगृहस्य द्वारं बद्धकपाटकं दृष्ट्वा "को मे गृहान्तरेऽस्ती"त्युच्चैः आक्रोशितवती । ततश्च सा "मम गृहस्य कपाटं मोचय, अहं निजगृहे प्रविशामीति यदा उक्तवती तदा गोपबालकाः द्वारमुद्घाटितवन्तः। सा गोपी गृहं प्रविश्य दधिदुग्धं, पक्वान्नञ्च न किञ्चिदवशेषितमस्तीति दृष्ट्वा विलपितवती । । तदनु सा प्रभावती नामिका गोपी बालकृष्णं कराभ्यां धृत्वाऽवदत्, अद्य त्वमागतोऽसि, त्वां गृहीत्वा तव मातरं प्रति नेष्यामि । ततो बालकृष्णः तामवदत्- मम युष्मद्भीति र्न वर्तते । अहं सखिभिः सह क्रीडन्नत्र प्रविष्टोऽस्मि । का हानिः वः कृता मया, अतो विनापराधं भयं मे नास्ति । यशोदायै च मम विषये त्वं किं वदिष्यसि । मिथ्यागसं मां माता न कदाचित् ताडयिष्यतीति । मम वचनं श्रुत्वा सा विहस्य अवदत्, त्वं किं मम गृहे स्थितानां द्रव्यणां भक्षणं तथा हरणं न कृतवान्? एतदहं यशोदायै वदिष्यामि । तदनु बालकृष्णं धृत्वा सा यशोदायाः समीपे आगतवती एवञ्च बालकृष्णस्य विषये अभियोगं कृतवती । परन्तु यशोदा उक्तवती यत्- मम गृहेपि दधिदुग्धादीनामभावो नास्ति । युष्मत्पुत्रकृतदोषः

मम पुत्रस्य कृते किमर्थं भवेत् । यदा भवती सप्रमाणमेव मम पुत्रमत्र आनेष्यति,तदा एवाहं तस्य दण्डविधानं करिष्यामि । ततः यशोदातः निरस्ता भूत्वा बालकृष्णस्य स्थाने सा तस्याः पुत्रमुखमेव दृष्टवती । तदनु बालकृष्णः तां गोपीं उक्तवान् – हे गोपिके! यदि पुनः मां धरिष्यति,र्तिहं तदाहं तव पत्युः रूपं धरिष्यामि । ततः व्रीडाहेतोः गोपिकाः न पुनः कदाचित् बालकृष्णस्य हस्तं धरन्ति स्म । एवम्प्रकारेण गर्गसंहितायां बालकृष्णस्य नवनीतहरणलीला सरससुन्दरतया वर्णितास्ति ।

**बोधप्रश्नः -**

१. गोपीनां गृहेभ्यः कः नवनीतानि हरति स्म ?

२. बालकृष्णस्य विविधलीलाचापल्यं काः द्रष्टुमिच्छन्ति स्म ?

**बालकृष्णस्य मृद्भक्षणं,कृष्णमुखे यशोदायाः ब्रह्माण्डदर्शनञ्च ।**

गर्गसंहितायां श्रीकृष्णस्य मृद्भक्षणलीलायाः सम्यक् वर्णनमुपलभ्यते । तद्यथा- यमुनातीरे कृष्णेन मृद्भक्षिता इति ज्ञात्वा रामादिभिर्बालकैः प्रेरिता यशोदा कृष्णं करे गृहीत्वा भर्त्सयामास । आत्मानं निर्दोषं प्रतिपादयितुं मातुरग्रतः सः स्वमुखं व्यापादयामास । बालकस्य प्रसारितमुखे स्वात्मना गोपगोप्यादिभिश्च सह वर्तमानं स्थावरजंगमात्मकं ब्रह्माण्डं दृष्ट्वा निमीलिताक्षी सा स्वपुत्रं साक्षाद्धरिरिति ज्ञातवती ।श्रीकृष्णस्तदा मातरं मायया मोहयन् जहास । तेन गतस्मृतिः सा दृष्टं वैभवं न सस्मारेति गर्गसंहितायामेवम्प्रकारेण श्रीकृष्णस्य मृद्भक्षणलीला सम्यगालोचितास्ति ।

**श्रीमद्भागवतटिप्पण्यां मृद्भक्षणस्य तात्पर्यमालोचितमस्ति तद्यथा-**

(१) भगवान् श्रीकृष्णश्चिन्तितवान् मयि शुद्धसत्त्वगुण एव वर्तते । किन्तु अग्रे बहूनि रजोगुणकर्माणि कर्तव्यानि सन्ति । अतस्तदर्थं किञ्चिद्रजसः संग्रहः करणीय इति । अतस्तेन मृद्भक्षणं कृतम् ।

(२) संस्कृतसाहित्ये पृथिव्या एकं नाम क्षमेति वर्तते ।श्रीकृष्णेन चिन्तितं यत् गोपालबालकस्तेन सह निर्द्वन्दं क्रीडन्ति , कदा कदा च तस्याऽपमानमपि कुर्वन्ति ।अतस्तैः साकं क्षमांशं धारयन् एव क्रीडनीयः, येन कोऽपि विघ्नो न भवेदिति । अतः क्षमायाः अर्थात् पृथिव्याः अंशं रजः एव स स्वीचकार।

(३)संस्कृतभाषायां पृथ्वीं रसा इति वन्दन्ति । श्रीकृष्णेन चिन्तितं “यदा मया सर्वे रसा आस्वादितास्तदा रसाया: रसस्याप्यास्वादनं करणीयमेवेति ।” एवं प्रकारेण मृद्भक्षणस्य बहुकारणानि प्रदर्शितानि सन्ति।

**यशोदाया: कृष्णमुखे ब्रह्माण्डदर्शनस्य हेतुरपि टिपण्यां विचारित: । तद्यथा-**

(१) श्रीकृष्णेन चिन्तितं माता मां केवलमाक्षिपति यत् “त्वया मृद्भक्षितमिति किन्तु सा न जानाति यत् मम भक्षणं नाम समग्रविश्वस्य भक्षणमिति । एतत् ज्ञापयितुं श्रीकृष्ण: स्वमुखे यशोदायै: ब्रह्माण्डं दर्शयामास ।

(२) “मृद्नाति प्रलये चूर्णतया स्वकारणे लीयते इति मृत्” । प्रलयकाले सम्पूर्णमुद् अथवा पार्थिवविकार: स्वकारेण लीनतां याति । अतएव चूर्णार्थकस्य मृद्धातो: मृच्छब्दो भवति । प्रलयक्रमानुसारं सर्वप्रथमं पृथिवी जले लीना भवति । जलं तेजसि, तेजश्च वायौ लीनतां याति । वायुराकाशे, तथाऽऽकाश अव्यक्ते लीनो भवति । अव्यक्तं नाम प्रकृति: ब्रह्मणि लीनं भवति । मृत् पृथिव्या: प्रतीकभूता । जिह्वायामिन्द्रियद्वयमस्ति वाणी, रसना च । वाणी तेजसो रसना जलस्य चाशंविशेषौ भवत: । मृद: जिह्वायां स्थापनमेव पृथिवीतत्त्वस्य जले, जलतत्त्वस्य तेजसि च लयस्य प्रतीकमस्ति । मुखस्याऽभ्यन्तरे आकाश: अर्थात् अवकाशोऽस्ति। एवं तत्र वायो: व्याप्तता स्वाभाविकी एव । मुखस्य विधानमव्यक्तताया: प्रतीकम् । सर्वस्याऽश्रयत्वेन श्रीकृष्णरूपं परंब्रह्मैव । अयं प्रलयब्रह्म । मुखस्योन्मोचने ब्रह्माण्डस्य दर्शनं सृष्टे: आश्रयरूपता एव । प्रलयस्य, सृष्टे: प्रकृते:, सर्वकारणकारणस्य परंब्रह्मणश्च निर्देशोऽनया लीलया कृतोस्तीति शम् ।

**बोधप्रश्न: -**

१. यमुनातीरे क: मृद्भक्षणं कृतवान्?

## उलूखले यशोदया कृष्णबन्धनरूपलीला तथा एतस्या: लीलाया: तात्पर्यम्

गर्गसंहितायां महर्षिनारद: महाराजबहुलाश्वस्य कृते श्रीकृष्णस्य उलूखलबन्धनलीलां वर्णयन् कथयति यत्- एकदा माता यशोदा प्रातरुत्थाय स्वयं दधिमन्थनं करोति स्म । दधिमन्थनसमये सा श्रीकृष्णस्य कर्माणि गायन् दधिमन्थनं करोति स्म । तदा बालकृष्ण: तत्राऽऽगत्य मन्थं हस्तेन धृतवान्, एवञ्च मातु: समीपे मधुरं ब्रुवन् स: वारम्बारं नवीनं नवनीतं याचितवान् । परन्तु माता बालकृष्णस्य वचनं न श्रुत्वा दधिमन्थनं चालितवती । तत: कृष्ण: क्षुब्धस्तथा क्रुद्धो भूत्वा समीपस्थक्षुद्रप्रस्तरखण्डेन दधिभाण्डं भग्नमकरोत् । अनन्तरं उलूखलमारुह्य दधिदुग्धादिन् आनीय

मर्कटेभ्यो दत्तवान् । श्रीकृष्णस्येदं दुश्चेष्टितं दृष्ट्वा यशोदा कृष्णं धर्तुं तस्याऽनुधावनं कृतवती । मातुः असमर्थतां दृष्ट्वा श्रीकृष्णः स्वयमेव मातुः ग्रहणेऽभवत् । भीतेः प्रदर्शनं तथा रोदनं कृत्वा मातुरनुकम्पां लब्धुं कृष्णोऽचेष्टत । किन्तु कोऽपि दण्डो दातव्य एवेति निश्चित्य यशोदा कृष्णं दाम्ना बद्धुमारब्धवती । किन्तु सर्वदा दाम अंगुलद्वयेन नून्यतामगच्छत् । गृहस्य सर्वाणि दामानि न्यूनतां गतानि । ततो यशोदां क्लान्तां दृष्ट्वा श्रीकृष्णः स्वयमेव बद्धतां गतः । माता यशोदा श्रीकृष्णमुलूखले बद्ध्वा अन्यकार्ये अलगत् । एवम्प्रकारेण गर्गसंहितायां उलूखले यशोदया कृष्णबन्धनलीला वर्णितास्ति ।

**उलूखलबन्धनस्य प्रतीकार्थता-**

अस्यां लीलायां भगवतः श्रीकृष्णस्य भक्तवश्यतायाः भगवत्तायाः कृपालुत्वस्य, विरुद्धधर्माश्रयतायाश्चाभिव्यक्तिर्जाता ।

विश्वमिदं यस्य विधानेन मायया च बद्धमस्ति, स स्वयं दाम्ना बद्धोऽभूदिति, भगवान् स्वभक्तवशवर्त्तित्वं द्योतयति ।

असीमोऽपि ससीमत्वं प्राप्तवान् मुक्तोऽपि बद्धो जात इति भगवतो विरुद्धधर्माश्रयतां लीलेयं प्रकाशयति।

श्रीकृष्णमतृप्तं त्यक्त्वा यशोदायाः कार्यान्तरे मग्नतादिकं द्योतयति यत् श्रीकृष्णे तस्या आसक्तिः नासीत् । यतो हि- इयमासक्तिः लौकिकमोहेन वाधिताऽभूत् । श्रीकृष्णो यशोदायाः स्वविषयकीमासाक्तिं द्रढी कर्तुं दामोदरलीलां रचितवान् । एवं यशोदायै निजस्वरूपज्ञानं दत्तवान् ।

**दाम्नः अंगुलद्वयनून्यतायाः कारणम् -**

(१) दाम्नः अंगुलद्वयन्यूनतायाः विशेषकारणमिदं यत्- अहंकारो ममत्वञ्च यावत् पर्यन्तं जीवे तिष्ठतस्तावत् पर्यन्तं भगवन्तं स्वभक्त्या बद्धुं न शक्यते । यदा निजबुद्धिविचारचातुर्यं, अहंभावो तिष्ठतस्तावत् पर्यन्तं भगवन्तं स्वभक्त्या बद्धुं न शक्यते । यदा निजबुद्धिविचारचातुर्यं, अहंभावो ममत्वञ्च सर्वथा त्यज्यते तदेव भगवान् भक्तेन निगृहीतो भवति ।

(२) श्रीकृष्णेन चिन्तितम् - यत्र नाम रूपञ्च भवतस्तत्र बन्धनमपि भवति । मयि परमात्मनि बन्धनस्य कल्पना कीदृशी ?यतो हि मयि नाम रूपं वा नास्ति । अंगुलद्वयन्यूनतायाः रहस्यमिदमेव।

(३) वृक्षद्वयस्योद्धारः करणीयः, इत्येवं सूचयन् अंगुलद्वयस्य न्यूनतां श्रीकृष्णेनाऽकारि ।

एवम्प्रकारेण गर्गसंहितायां यशोदया उलूखले कृष्णबन्धनलीलाविष्कृतास्ति शम् ।

**बोधप्रश्नः-**

१. प्रातरुत्थाय का दधिमन्थनं करोति स्म ?

**यमलार्जुनवृक्षयोः वृक्षत्वलाभहेतुः यमलार्जुनभङ्गश्च**

श्रीमद्गर्गसंहितायामयं प्रसंगः एवं प्रकारेण वर्णितोऽस्ति यत्- यशोदा प्रातरुत्थाय दधिममन्थ । तदा श्रीनन्दनन्दनो मञ्जीररावं संकुर्वन् नवनीतार्थं ननर्त । नवनीतार्थं प्रसारितं बालहस्तं यशोदा रुषा क्षिप्तवती । तेन रुष्टः श्रीकृष्णः दधिभाण्डं बभञ्ज । यशोदा श्रीकृष्णमुदूखले बबन्ध । श्रीकृष्णः उदूखलमाकृष्य यमुनातीरं गत्वा तिर्यग्भूतेनोदूखलेन यामलार्जुनौ बभञ्ज । वृक्षाभ्यां द्वौ देवौ विनिर्गत्य श्रीकृष्णं परिक्रम्य स्तुत्वा नत्वा चाऽकाशं गतवन्तौ । तौ वृक्षौ वस्तुतो नारदस्य शापेन वृक्षरूपं प्राप्तवन्तौ द्वौ कुवेरतनयौ नलकुवेरमणिग्रीवावेवाऽऽस्ताम् । एतौ श्रीकृष्णस्य चरणस्पर्शं प्राप्य मुक्तौ भूत्वा उत्तमरूपवेशभूषाभिः युक्तौ श्रीकृष्णस्य वन्दनस्तवनप्रदक्षिणादिकं कृत्वाऽऽकाशेऽन्तर्हितौ अभवताम् । विना वृष्टिं, विना वातञ्च वृक्षस्य पतनं दृष्ट्वा सर्वे गोपवासिनश्चकिताः अभवन् । यद्यपि समीपस्थगोपलकाः सर्वं श्रीकृष्णस्य चेष्टितमिति उक्तवन्तस्तथापि तेषां वचसि कोऽपि विश्वासं न स्थापितवान् । इदं दैवव्युत्पातं मत्वा सर्वे आतंकिता अभवनिति । श्रीमद्गर्गसंहितायां यमलार्जुनयोः पूर्वजन्मवृत्तान्तोऽपि प्रदत्तोऽस्ति ।

**यमलार्जुनयोः पूर्वजन्मवृत्तान्तः**

एकदा कुवेरस्य सुतौ स्वकं पितरं “सर्वदेवानां कः श्रेष्ठः ? जनैश्च कः पूजनीयः ? कस्य देवस्य पूजनान्मनुष्यो निर्भयो जायते । कञ्च भजन् जन्तुः सद्यः संसारबन्धनान्मुच्यते, इह संसारे भोगान्, परत्राऽत्युत्तमां गतिञ्च प्राप्नोतीति पृष्टवन्तौ । कुवेर उत्तरितवान् यत्- विष्णुः सर्वेश्वरः सर्वैः सेव्योऽसौ भक्तवत्सलः । कुवेरेण एवमादिष्टौ तौ नानापूजाप्रयोगैः विष्णोराधनं प्रेमभक्तितः कृतवन्तौ । एकदा तौ अलकां यान्तौ महादेवगणश्रेष्ठं भक्तवेष्टितं नन्दिनमपश्यताम् । तौ नन्दिनं तव प्रभुः कः? इति पृष्टवन्तौ नन्दी अवदत्- हे कुवेरतनयौ ! मम नाथो महेश्वर इति श्रुणुतं, यः स्वयं विश्वमखिलं सृजत्यवति हन्ति च । वयं सर्वे तस्य सेवकाः, बहवश्च मत्समाः अन्ये सन्ति । ते सेवकाः सदानन्दमयाः सततं निर्भया एव । ते च सेवकाः स्वेच्छया चरन्तः कर्मपाशैर्न संयुता भवन्ति । पुनश्च – तेषां भक्ष्याभक्ष्ये तथा पापे च दूषणं न भवति । एवं प्रकारेण नन्दिवचः श्रुत्वा

भ्रान्तचित्तौ तौ हरिभक्तिं विहाय, संजातौ शिवसेवकौ । ततः आरभ्य तौ कुवेरतनयौ मत्तौ बभूवतुः । तौ कुकर्मादीनि चाकुरुताम् । एकदा शैलविपनरम्ये मन्दाकिनीतटे तौ स्त्रीगणैरनुगायद्भिः मत्तौ विचेरतुः । एतस्मिन् समये महर्षिनारदस्तत्राऽऽगतवान् । तौ कुवेरतनयौ सत्संगेन श्रिया युक्तावपि दुस्संगदूषितौ आस्ताम् । महर्षिनारदं दृष्ट्वापि तयोः ज्ञानं नाभूत् । मदमत्तौ तौ नारदममुनिमविगणय्य तं प्रणाममपि न कृत्वा वस्त्रहीनतया निर्लज्जरूपेण स्त्रीभिः सह रतिक्रीडायां मग्नौ अभवताम् । एवम्प्रकारेण तौ कुवेरतनयौ विषयाषक्तौ दृष्ट्वा नारदमुनिः चिन्तितवान् यत्- एषा विषयमतिः एतयोः कदापि यथा न भवेत्, तथैव मयोपायः करणीयः । ततो नारदमहर्षिः तौ कुवेरतनयौ तरुजन्म प्राप्य देवतानां शतवर्षेऽतिक्रान्ते श्रीकृष्णस्य दर्शनं लब्ध्वा तस्मिन् भक्तिञ्च लब्ध्वा मुक्तौ भविष्यत, इति शप्त्वा प्रस्थितवान् । एवम्प्रकारेण गर्गसंहितायां यमलार्जुनभङ्गो तयोः पूर्वजन्मवृत्तान्तोपि सम्यक् उपन्यस्तोस्तीति शम् ।

**बोधप्रश्नः-**

१. कः रुष्टो भूत्वा दधिभाण्डं बभञ्ज ?

२. कुवेरतनयौ कः शप्तवान् ?

## सारांशः

तृणावर्तान्तान् राक्षसान् भगवान् श्रीकृष्णः वयसः षण्मासाभ्यन्तरे हेलया हत्वा अनन्तरं किञ्चिद्वयः प्राप्तः सन् स्वलीलाचातुर्यं प्रकाशयितुं समारेभे । तदारभ्य याः लीलाः प्रकाशिताः अभवन्, ता एव बाललीलारूपेण शास्त्रेषु प्रसिद्धा जाताः। एवंविधासु लीलासु नवनीतहरणादयः तिस्रः लीलाः गर्गसंहितायां सरसतया वर्णिताः सन्ति । अधुनाऽत्र क्रमशस्ता विमृश्यन्ते । अस्मिन् क्रमे अत्र प्रथमतः श्रीकृष्णस्य नवनीतहरणं तथा तस्याः लीलीयाः तात्पर्यं,ततः गोपीनां गृहेभ्यो नवनीतहरणं,तत्र लीलाचातुर्यञ्च वर्णितमस्ति । तदनु कृष्णस्य मृद्भक्षणं,कृष्णमुखे यशोदायाः ब्रह्माण्डदर्शनञ्च उपन्यस्तमस्ति । ततः यमलार्जुनवृक्षयोः वृक्षत्वलाभहेतुः यमलार्जुनभङ्गश्च इति एते विषयाः श्रीमद्गर्गसंहितायाः प्रस्तुतपाठ्यक्रमस्यास्मिन् चतुर्थांशे विशेषतः एतान् विषयान् छात्राः सारांशत्वेन जानीयुः ।

## आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः-**

१. श्रीकृष्णस्य मृद्भक्षणलीलां प्रकाशयत ।

२. गोपीनां नवनीतसंग्रहविषये लिखत ।

३. यशोदायाः बालकृष्णस्य मुखे ब्रह्माण्डदर्शनमुद्दिश्य लिखत ।

**विश्लेषणात्मकप्रश्नाः –**

१. उलूखले यशोदया कृष्णबन्धनरूपलीलाविषयं विशदयत ।

२. गोपीनां बालकृष्णे स्नेहाधिक्यमुद्दिश्य लिखत ।

**निबन्धात्मकप्रश्नाः-**

१. बालगोपालस्य गोपीनां गृहेभ्यो नवनीतहरणं, तत्र लीला-चातुर्यञ्च समुद्दिश्य लिखत ।

२. यमलार्जुनवृक्षयोः वृक्षत्वलाभहेतुः यमलार्जुनभङ्गश्चेति विषयान् विशदयत ।

**एकाङ्कप्रश्नाः-**

१. व्रजे कस्य बाललीलां द्रष्टुं गोपिकाः लालायिताः भवन्ति स्म ।

२. व्रजे कः मधुरं मनोमुग्धकरं बालचापल्यमाचरितवान् ।

३. कुवेरतनयोः नाम किमासीत् ।

४. धनाधिपतिः देवः कः ।

५. नलकुवेरमणिग्रीवौ नाम कौ ।

६. कुवेरतनयौ कः शप्तवान् ।

७.गोप्यः नवनीतं कुत्र स्थापयन्ति स्म ।

८. कैः साकं मिलित्वा बालकृष्णः नवनीतानि हरति स्म ।

९. बालकृष्णः कासां गृहेभ्यः नवनीतानि हरति स्म ।

१०. मदमत्तौ स्त्रीभिः सह कामक्रीडारतौ कौ आस्ताम् ।

११. कुवेरतनयौ नारदमुनिः कथं शप्तवान् ।

१२. बालकृष्णं उलूखले का वद्धवती ।

१३. किं अंगुलद्वयेन नून्यतामगच्छत् ।

१४. माता यशोदा बालकृष्णं कुत्र वद्धवती ।

१५. का नामिका गोपी बालकृष्णं मातुः यशोदायाः समीपे आनीतवती ।

१६. नवनीतचौरः नाम कः ।

**उत्तराणि-**

१. बालकृष्णस्य २. बालकृष्णः ३. नलकुवेरमणिग्रीवौ ४. कुवेरः ५. कुवेरतनयौ ६. नारदमहर्षिः ७. स्वगृहे शिक्याम् ८. सखिभिः सह मिलित्वा ९. गोपीनां गृहेभ्यः १०. कुवेरतनयौ ११. तौ धनगर्वितौ मदमत्तौ आस्तामिति हेतोः १२. माता यशोदा १३. दाम १४. उलूखले १५. प्रभावती नामिका गोपी १६. बालकृष्णः

-------- ॐ शान्तिः शान्तिः शान्तिः ॐ --------